International Journal of Sanskrit Research 2021; 7(6): 11-13

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 11-13
© 2021 IJSR
www.anantaajournal.com
Received: 10-09-2021
Accepted: 12-10-2021

**Dr. Debabrata Naik**
Guest Faculty,
Department of Sanskrit,
Rajendra University, Odisha, India

# चण्डिकासप्ततिस्तोत्रस्येकं समीक्षा

## डा. देबब्रत नाएकः

### प्रस्तावना

सम् + कृ धातुः + क्तप्रत्ययः संस्कृतमिति शब्दस्य निष्पन्नः। सम् उपसर्गपूर्वकात् धाधातोः क्तप्रत्ययेन सह ष्यञ्प्रत्यययोगे साहित्यशब्दस्य सिद्धिर्भवति, यस्यार्थः समष्टिरेवाङ्गीक्रियते। डुधाञ् धारणपोषणयोः इति सूत्रानुसारेण धारणपोषणार्थकोऽयं धा धातुरेव सहितशब्दस्य साहित्यशब्दस्य वा मूलमस्ति। अतः सम्यकतया धीयते अर्थात् धार्य्यते पोष्यते वा येन सः सहितः, सहितस्य भावो वा गुणो वा धर्मो वा साहित्यमीति निश्चीयते। सकलज्ञानशास्त्रादिषु साहित्यशास्त्रं श्रेष्ठं इति प्रतिपादितम् धर्मार्थकाममोक्षाः इति चत्वारः पुरुषार्थाः मानवजीवनस्य प्रमुखाः अवयवाः। एतेषां विवेचनं महत्वञ्च संस्कृतसाहित्यशास्त्रे विस्तारतया परिदृश्यते।

संस्कृतसाहित्ये स्तोत्रसाहित्यमेकं जाजल्यमानमणिमिव भाति। स्तोत्रशब्दस्य व्यत्पत्तिः स्तु इति (प्रशंसा अर्थकम्) धातोः निष्पत्तिः। [1] स्तुयते अनेन इति स्तोत्रम्। स्तुयते अनेन इति स्तोत्रम्। गुणिनिस्थगुणभिधानम् स्तोत्रम्। [2] आराध्यदेवान् कृते स्वहृदयस्य भावं गेयरूपेण प्रकाशनं स्तोत्रं कथ्यते। स्तोत्रे भक्तिं एवं वैराग्यं मुख्यं विषयः भवति। ऋग्वेदादेव एतेषां उत्पत्तिः मन्यते। लौकिकस्तोत्रसाहित्ये रामायणे उल्लेखितं आदित्यहृदयः प्रथमम् स्तोत्रकाव्यम्। कालिदास रामानुज नामेन वहुः रचना लभ्यते। स्तोत्रकाव्येषु सप्तमशताब्द्याः बाणभट्टस्य चण्डीशतकम् एकं अमूल्यं कृतिः। इयम् श्रगधरा छन्दावद्धा शतश्लोकविशिष्टम् चण्डीस्तुत्यात्मकम् स्तोत्रकाव्यम्।

चण्डीशतकस्योत्पत्तिः –

कथ्यते मयुरः बाणभट्टस्य श्वसुरः वा ज्यष्ठश्यालकः आसीत्। सः एकदा पुत्र्या वा भगिन्या गृहं गतवान्। वहिः स्थितः सः रात्रौ दम्पत्योः प्रणय कलहं श्रृतवान्। तामनुलालयता बाणेनोक्तं तत्र –

गतप्राया रात्रिः कृशतनु शशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो

इति प्रयतोमानोऽपि बाणश्चतुर्थं चरणं नैव पूरयितुमशक्यत्। तदेव पुनः पुनः कथयन्नेव स्थितः।

**Corresponding Author:**
**Dr. Debabrata Naik**
Guest Faculty,
Department of Sanskrit,
Rajendra University,
Odisha, India

एतच्छ्रुत्वोद्बुद्धभावो मयुरः कुत्रास्मीति विस्मृत्य चतुर्थं चरणमित्थमुक्तवान् –

**कुचप्रत्यासत्त्या हृदयमपि ते चण्डी कठिनम्।।**

इति। प्रणयकलहविघ्नाज्जातमन्युर्बाणपत्नी स क इत्यविचिन्त्यैव तं कुष्ठाक्रान्तो भव इति शशापेति एका परम्परा। अपरजनश्रुत्यनुसारं तु प्रणयकलहविघ्नेन जातमन्युर्बाणो बहिरागत्य तं कुष्ठाग्रन्तो भव इति शशाप। ततश्च जातपश्चात्तापौ तौ परस्परमाशिषा संयोजयामासुः। अथ च कुष्ठाक्रान्तो मयुरः सूर्यशतकं प्रणीय तत्प्रसादान्मुक्तरोगो बभूव, बाणश्च चण्डीशतकं निर्मायेति।

चण्डीशतकमिति ग्रन्थस्य नाम सति अत्र शतकमद्धे स्तोत्राणि प्राप्यन्ते। बाणभट्टः श्वशुरस्य अभिशापात् मुक्तिनिमितार्थे चण्डीकायाः उपासना कृतं एवं चण्डीशतकमिति स्तोत्रं लिखितम्। अनुमियते महाकवि बाणभट्ट देव्याः उपासकः आसीत् अतः सः विभिन्न समये देवीं स्तुत्यार्थे सप्ततिः श्लोकं विरचितम्। 3 यदा मयुरः बाणभट्टं शापयति तदा सः पुनः त्रिंशत् श्लोकं रचयित्वा चण्डीशतकमिति संपादितम्।

बाणभट्टः विरचितं चण्डीकशतकस्याद्य सप्ततिः श्लोकं संकलितम् ग्रन्थं चण्डिकासप्तति इति अभिधीयते। अस्मिन् सप्ततिसंख्यकान् श्लोकान् उपरि गोविन्दामृतः,बाणभट्टः एवं विद्यापूरणमुनीन्द्रं विरचितं व्याख्याः लभ्यते। तेषु विद्यापूर्णमुनीन्द्रं विरचितं व्याखायाः मातृकायाः विवरणम् अधोल्लेखितम्। यथा –

**प्रथममातृकायाः विवरणम् –**

विषयः – चण्डिकासप्ततिव्याख्या, कर्ता – विद्यापूर्णमुनिन्द्रः, मातृकासंख्या – 7546

मातृकाप्राप्तिस्थानम् – Government Oriental Manuscript Library, Madras

लेखन सामग्री – कार्गजपत्रम्, लिपिः – देवनागरी, पृष्ठासंख्याः - 92

**द्वितीयमातृकायाः विवरणम् –**

विषयः – चण्डिकासप्ततिव्याख्या, कर्ता – विद्यापूर्णमुनिन्द्रः, मातृकासंख्या – S.R - 34

मातृकाप्राप्तिस्थानम् – Government Oriental Manuscript Library, Madras

लेखन सामग्री – तालपत्रम्, लिपिः – ग्रन्थः, पृष्ठासंख्याः – 48 Folio

मातृकायाः विवरणम् - सम्पूर्णम्

**तृतीयमातृकायाः विवरणम् –**

विषयः – चण्डिकासप्ततिव्याख्या, कर्ता - विद्यापूर्णमुनीन्द्रः, मातृकासंख्या – 1120

मातृकाप्राप्तिस्थानम् – Government Sanskrit College, Tripunithura

लेखनसामग्रिः – कार्गजपत्रम्, लिपिः – मालायलम्, पृष्ठसंख्याः – 137

मातृकायाः विवरणम् – संपूर्णम्

**चतुर्थमातृकायाः विवरणम् –**

विषयः – चण्डिकासप्ततिव्याख्या, कर्ता – विद्यापूर्णमुनीन्द्रः, मातृकासंख्या – 1150

मातृकाप्राप्तिस्थानम् – Oriental Research Institute, Trivendrum.

लेखनसामग्रिः – कर्गजपत्रम्, लिपिः – देवनागरी, पृष्ठासंख्या – 93

मातृकायाः विवरणम् – संपूर्णम्

हर्षचरितस्य मङ्गलाचरणे देवीचण्डिकायाः प्रार्थनामपि प्राप्यते, तस्मात् महाकविबाणभट्टः चण्डिकायाः उपासकः आसीतित्यनुमियते। अत्र बाणभट्ट श्रगधारा छन्दे, गौडिरीत्यां, एवं भाषायाः सुसंज्ञोजना आधारित्वा उपमा, उत्प्रेक्षा, श्लेष, यमक अतिशयोक्त्यादि अलङ्कारणां प्रयोगं कृत्वा विरचितम्। यद्यपि अयं स्तोत्रस्य प्रमुखंछन्दं श्रगधरा परन्तु 32, 55, 56 इति त्रयस्तोत्रं शार्दुलविक्रिडित छन्देन रचितमिति प्राप्यन्ते।

**चण्डिका उपासनायाः प्रासङ्गिकता –**

भगवान् उपासकाः स्वान्तर्निहितं भावं गानरूपेण प्रकाशनं कुर्वन्ति। उपासकाः द्राविकोपासना, यज्ञिकोपासना एवं मानसिकोपासना (स्तोत्रद्वारेणोपासना) इति त्रिविधाः उपासनाः कुर्वन्ति। एतेषु उपासनाषु स्तोत्रद्वारेणोपासना श्रेष्ठं इति प्रतिपादितम् मोक्षं प्रदान कारणात्। यथा श्रीमद्भगवदगीतायां श्रीकृष्णः प्रोक्तम् –

**महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्**

**यज्ञानां जपोयज्ञोऽस्मि स्थावराणां हिमालयः।।** [4]

स्तोत्रसाहित्यस्य परिमितिः वहु विशालः। अष्टक, शतक, सहस्रनामवलिः नामे स्तोत्रसाहित्य वहवः स्तोत्राः सन्ति। एतेषु शतकमन्तर्गतं चण्डीशतकं।

चण्डिकासप्ततिः महाकविबाणभट्टेन देवीचण्डिकायाः चरणस्य विभिन्नप्रकारेण प्रशंसा कृतं भक्तिरसप्रधानं स्तोत्रकाव्यम्। यदि वा बाणभट्ट गद्यरचनायां प्राज्ञः सति पद्यरचनायामपि न न्युनं आसीदिति तस्य स्तोत्रकाव्यात् प्रमाण्यते। उत्प्रेक्षा, वर्णानुप्रास, चित्रानुप्रास, श्लेष, यमकाद्यलङ्कारस्य प्रयोगमति वैचित्र्यभावेन वर्णनं कृतम्। अस्मिन् स्तोत्रकाव्यस्य 32, 55, 56 इति स्तोत्रत्रयं

शार्दुलविकिडितं छन्दे एवं अन्यसर्वं श्रगधराछन्दे सन्ति। अत्र औचित्य निर्वाहणदृष्ट्या श्रुङ्गारस्य वर्णनं वर्तते एवं प्रशान्त, वीररसादि वर्णनमपि अस्ति। गौडिरीतिः, ओजगुणं एवं उत्प्रेक्षा, उपमा, अनुप्रास, श्लेष,अतिशयोक्त्यादि अलंकाराणां प्रयोगं इतस्ततः प्राप्यते। बाणभट्टस्य वाग्वैचित्र्यं अवगम्यं अत्यधिकं कष्टकरं आसीत्। श्लेषालङ्कारस्य प्रयोगं वहुधा प्राप्यन्ते यथा –

ग्रस्ताश्वः सस्पलोभादिव हरितहरेरप्रसोढानलोष्मा
स्थाणौ कण्डूं वीनिय प्रतिमहिषरूषमेवान्तकोपान्तवर्ति
कृष्णं पङ्कं यथेच्छनवरुणमोपगत मज्जनायेव यस्याः
स्वस्थाभूत्पादमास्वा हृदमिव महिषः सास्तु दुर्गा श्रिये वः।।8।।

अत्र श्लेशपदानि – हरित - कोमलश्यामलतृण, हरिः - अश्वः, हरितहरिः – आदित्यः, स्थाणौ – शिवः, महिषः, कृष्णं - विष्णुः, कृष्णं - महिषः।

**उत्प्रेक्षालङ्कारस्य विमर्शः –**

मृत्योतुल्य त्रिलोकीं ग्रसितुमतिरसान्निसृताः किं नु जिह्वाः
किं वा कृष्णाङ्घिपद्मद्युतिभिररुणिता बिष्णुपद्याः पदव्यः
प्राप्ताः सन्ध्याः स्मरारेः स्वयमुत नुतिभिस्तित्र इत्यूह्यमाना
देवैर्देवीत्रिशूलाहतमहिषजुषो रक्तधारा जयन्ति।।

अत्रोपमानपदानि यथा – मृत्यो जिह्वा, विष्णुपद्याः पदव्यः, स्मरारेः सन्ध्याः। उपमा वाचक शब्दः – महिषजुषो रक्तधारा। अत्र देवी चण्डिकायाः त्रिशूलेन क्षत महिषस्य शरीरात् प्रवहः रक्तधाराः सह महाकालस्य त्रैलोक्यं ग्रसितुं प्रसारिताः जिह्वाः, विष्णोः रक्तवर्णचरणेन रञ्जित रक्तवर्ण गंगायाः प्रवाहः, महाप्रभु शम्भोः नृत्यदर्शनार्थं समागताः सन्ध्यात्रयं तुलना वर्तते। अतः अत्र महाकालस्य जिह्वादि उपमानाः शब्दाः महिषस्य रक्तधाराः द्वारा उपमेयशब्दस्य सम्भावना कारणात् उत्प्रेक्षाऽलङ्कारः वर्तते।

मा भाङ्क्षी विभ्रमं भ्रूरधरविधुरता केयमस्यास्यरागम्
पाणे प्राण्येव नायं कलयसि कलह श्रद्धया किं त्रीशूलम्
इत्युद्योतकोपहेतुन्प्रकृतिमवयवान्प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मूष्यात्मरुदसहृदसुन्संहरनघ्रिंरहः।।

भावार्थः – देव्या चरणं युष्माकं पापं नाशयतु। यो पादं देवतानां असहृदस्य प्राणं संहृतवान् अर्थात् महिषासुरस्य प्राणं नाशितवान्। हे अधरः किमिदं वैक्लव्यम्, हे मुखं लौहित्यमस्य परित्यज। हे हस्त, किमर्थं संग्राम इच्छया त्रिशूलं वध्नासि यद्वायं न पुरुषः प्राण्येव जन्तुमात्रोऽयमस्मत्पादतलाघातमात्रसाध्यः, अमुना प्रकारेण आविर्भवक्रोधात् अङ्गप्रत्यङ्गान् पूर्वावस्थां प्रापयन्त्या एव। किमर्थं युष्माभिरसमय एव वृथा कोपादि विकृतिरास्थीयते, स्वास्था भवन्तु भवन्तः। महिषासुरः पुरुषः नास्ति सः जन्तुमात्रमेव इति पदेन पुरुषः इति उपमानेन प्रकृतस्य सम्भावना कारणात् उत्प्रेक्षालङ्कारः वर्तते।

मातृकाणां उपलब्धानुसारं यथाशक्ति चण्डिकासप्ततिव्याख्यायाः समीक्षात्मक सम्पादनं कृतम्। येन संस्कृतवाङ्मये स्तूत्य भक्तिभावस्य अभिव्यक्तिः भाषायां स्तोत्रसाहित्यरूपेण निर्गत्य कालान्तरे स्तोत्रसाहित्यं ज्ञानपरम्परायाः विकासः स्पष्टी भवति।

**सन्दर्भः**


1. शब्दकल्पद्रुमः
2. श्री मातृका पुष्पमालास्तुतिः – Trans. Dr. S.S. Janaki, Vol. V, No. 4
3. A Catalogue of South Indian Sanskrit Manuscripts (Especially those of the Whish collection) in the Royal Asiatic Sociaty, London, compiled by M. Winternitz,1902.
4. श्रीमद्भगवद्गीता – 10.25